# शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र दिल्ली

## COMPREHENSIVE ASSESMENT FEEDBACK- 2025-26

कक्षा–दशमी विषयः संस्कृतम्

**खण्डः- क**

**अपठितांश – अवबोधनम्**

**1.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम्**

भारतदेशः एकः उत्सवप्रियः देशः अस्ति। अत्र प्रतिदिनमेव कोऽपि उत्सवः आयोज्यते। जनाः उत्सवानां माध्यमेन न केवलं उत्साहस्य सकारात्मकतायाश्च भावान् प्रदर्शयन्ति, अपितु स्वकीयायाः संस्कृतेः परम्परायाश्च निर्वहनं कुर्वन्ति। भारते क्षेत्रानुसारं अनेके प्रमुखोत्सवाः सन्ति। उत्तरभारते दीपोत्सवः प्रमुखोत्सवः वर्तते। बिहारक्षेत्रे षष्ठीपूजनं प्रमुखतया आयोज्यते। एवमेव बङ्गप्रदेशे दुर्गापूजा, असम-प्रदेशे 'बिहू', उत्कलप्रदेशे रथयात्रा, केरलप्रदेशे ओणम्, महाराष्ट्रप्रदेशे गणेश-चतुर्थी, गुजरातप्रदेशे नवरात्रम्, ब्रजक्षेत्रे होलिकोत्सवः पञ्जाबप्रान्ते च लोहड़ी - इत्यादयः उत्सवाः प्रमुखरूपेण आयोज्यन्ते।

एतषाम् उत्सवानाम् आयोजनं, जनानां कृते उत्साहकरं रुचिकरं च भवति। भारतदेशस्य संस्कृतेः वैविध्यं द्रष्टुम् एतेषाम् उत्सवानां बहु महत्वं विद्यते। एते उत्सवाः जीवनं प्रति भारतीयानां दृष्टिकोणं स्पष्टतया प्रस्तुवन्ति यत् जीवने सुखानि दुःखानि तु जायन्ते एव, किन्तु प्रत्येकस्यामपि परिस्थतौ उत्साहस्य सकारात्मकतायाश्च समावेशः सदा करणीयः।

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) (2x1=2)**

(i) छात्राः अपठितगद्यांशात् एकपदस्य समुचितोत्तरस्य अन्वेषणं कुर्वन्ति।
**परामर्शः**– छात्रान् वाक्यस्य समुचितं अर्थग्रहणाय प्रेरणम्।

(i) भारतदेशः कीदृशः देशः अस्ति ? **उत्सवप्रियः**
(ii) व्रजक्षेत्रे प्रमुखोत्सवः कः ? **होलिकोत्सवः**
(iii) कुत्र षष्ठीपूजनं प्रमुखतया आयोज्यते ? **बिहारक्षेत्रे**

**आ. पूर्णवाक्येन लिखत - ( केवलं प्रश्नद्वयम् )** (2x2=4)

(i) छात्राः अपठितगद्यांशात् आत्मावबोधनाधारेण उत्तरनिर्धारणार्थं समुचितवाक्यानां चयनं कुर्वन्ति।
**परामर्शः**– छात्राः अपठितगद्यांशस्य अवबोधने समर्थाः भवेयुः।

(i) जनाः उत्सवानां माध्यमेन किं प्रदर्शयन्ति ?

**उत्तरम्**– जनाः उत्सवानां माध्यमेन उत्साहस्य सकारात्मकतायाश्च भावान् प्रदर्शयन्ति।

(ii) उत्सवानाम् आयोजनं जनानां कृते कीदृशं भवति ?

**उत्तरम्**– उत्सवानाम् आयोजनं उत्साहकरं रुचिकरं च भवति।

(iii) उत्सवाः भारतीयानां किं दृष्टिकोणं स्पष्टतया प्रस्तुवन्ति ?

**उत्तरम्**– एते उत्सवाः जीवनं समावेशः सदा करणीयः ।

**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।(1x1=1)**

**परामर्शः**– छात्राः अपठितगद्यांशस्य मुख्यभावग्रहणे समर्थाः भवेयुश्चेत् द्वित्रिपदात्मकं शीर्षकं चेतुं समर्थाः भविष्यन्ति।

**ई. यथानिर्देशम् उत्तरत (3x1=3)**

(i) "उत्सवप्रियः देशः" अत्र विशेषणपदं किम् ?

(क) "देश:" इति विशेष्यपदम्।

(ख) अस्ति इति चित्तभ्रामकः विकल्पः।

(ग) "उत्सवप्रियः" इति समुचितम् उत्तरम्

(घ) भारतदेशः इति असम्बद्धः विकल्पः।

ii) "जीवने सुखानि दुःखानि तु जायन्ते एव" अस्मिन् वाक्ये क्रियापदं किम् ?

(क) जीवने इति असम्बद्धः विकल्पः।

(ख) सुखानि इति असम्बद्धं विकल्पम्।

(ग) दुःखानि इति असम्बद्धं विकल्पम्।

(घ) जायन्ते इति समुचितः विकल्पः।

**परामर्शः**– वाक्यरचनायाः अभ्यासे कर्तृक्रियापदानां ज्ञानम्।

(iii) 'ऐक्यं' इत्यस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम् ?

(क) महानताम् इति असम्बद्धं विकल्पम्।

(ख) वैविध्यम् इति समुचितः विकल्पः।

(ग) निर्वहनम् इति असम्बद्धं विकल्पम्।

(घ) रूचिकरम् इति चित्तभ्रामकः विकल्पः।

**परामर्शः**– वाक्यरचनायां पर्यायविलोमपदानाम् अभ्यासः

'ख'-खण्डः

(रचनात्मकं-कार्यम्) (15 अङ्काः )

**2. अ. भवती राधिका अस्ति। भवत्याः विद्यालये स्वच्छतायाः पक्षाचरणं जातम् । तस्य वर्णनं कुर्वन् मञ्जूषापद-साहाय्येन स्वमित्रं ज्योतिं प्रति पत्रमेकं लिखत– (5)**

**मञ्जूषा**

| |
|---|
| गतमासे, स्वच्छता, उद्घाटनं, प्रातःकाले, जनजागरणम्, कुशली, आयोजितः, सन्देशः, प्रसारितः, स्वरूपः |

अथवा

**आ. भवान् राघवः अस्ति। भवतः गृहस्य आर्थिकस्थितिः शोचनीया अस्ति। मञ्जूषायाः प्रदतशब्दैः विद्यालयशुल्कक्षमार्थं प्राचार्यं प्रति पत्रं लिखत।** (5x1=5)

**मञ्जूषा**

| |
|---|
| धनम्, दशमीकक्ष्यायां, आर्थिकस्थितिः, असमर्थः, नास्ति, शुल्कदातुं, समीचीना, आज्ञाकारी, अस्मि, भवतः |

**परामर्शाः-** औपचारिकस्य अनौपचारिकस्य च पत्रस्य प्रारूपस्य ज्ञानम्। छात्रेषु रचनात्मकदक्षतायाः वर्धनाय पत्रलेखनस्य समये समुचितानां शब्दानां चयनकौशलस्य सामर्थ्य-संपादनम्।

**3. अ. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत-**



| |
|---|
| जलपोतः, समुद्रे, सामग्रीवहनाय, प्रयुज्यते, आवागमनस्य, सर्वसौविध्यं, सीमासुरक्षा, अन्वेषणम्, समुद्रतटम्, आधुनिकाः, यात्रार्थम् |

अथवा

आ. मञ्जूषायां प्रदत्तशब्दानां साहाय्येन अधोलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–

"सञ्चार-साधनानि "

**मञ्जूषा**

| |
|---|
| वैज्ञानिकाः, आविष्कारान्, सन्देशप्रेषणे, लोकप्रियम्, कार्यालयेषु, सभागारेषु, चलभाषिकयन्त्रम्, सर्वत्र, अविवेकपूर्णः, वार्तामग्नाः, दुष्प्रयोगेण, कुर्वन्ति |

**3. चित्रवर्णनम्** **( 1x5 = 5 )**

अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते । वाक्यशुद्धि: द्रष्टव्या । अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति । वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति । प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्क:च व्याकरणशुद्धतानिमित्त निर्धारितः अस्ति । मञ्जूषायां प्रदताः शब्दाः सहायतार्थं सन्ति । छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति । छात्र : स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति । मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माण कर्तुं शक्यते ।

अथवा

**आ. अनुच्छेदलेखनम्**

अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्त्य अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्त्य वाक्यनिर्माणं कर्तुं शक्यते। ।अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीया: ।

**4. अनुवादः** **(5x1=5)**

(i) सीता गृहं गच्छति।

(ii) सः उदररोगेण पीडितः अस्ति।

(iii) अस्मिन् वर्षे महती वृष्टिः अभवत्।

(iv) भ्राता भगिन्यै उपहारं ददाति ।

(v) नद्याः तटे वृक्षाः सन्ति ।

**परामर्श:-** छात्रान् कर्तृपदानां क्रियापदानाम् अवबोधनं कुर्युः। कारकविभक्त्यनुगुणं छात्राणां कृते वाक्यरचनाया: अभ्यास:। कर्तृवाच्ये क्रिया कर्ताऽनुगामिनी भवेत् इति ध्यातव्यम्।

**'ग'- खण्डः**

( अनुप्रयुक्त-व्याकरणम्) (25 अङ्काः )

**5. अ. सन्धिं सन्धिच्छेदं वा कुरुत -** (4x1=4)

(i) यत् **मानुषात्+अपि** बिभेषि । **मानुषादपि** अभ्यासवान भव पुस्तकस्य साहाय्येन व्यञ्जनसन्धिं बोधयत।

(ii) वने **<u>मृगाश्चरन्ति ।</u>** **मृगाः+चरन्ति** अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।

(iii) **<u>एकस्तावत्</u>** विभज्य भुज्यताम् । **एक+तावत्** अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।

(iv) **<u>रामः+ आगच्छति</u>** **राम आगच्छति** अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।

**अथवा**

**आ. अधोलिखितेषु - वाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत**

(i) **<u>नास्ति + उद्यमसमो</u>** बन्धुः । **नास्त्युद्यमसमो** अभ्यासवान भव पुस्तकस्य साहाय्येन व्यञ्जनसन्धिं बोधयत।

(ii) समुचित **<u>सन्निवेशः</u>** स्यात् । **सत्+निवेशः** अभ्यासवान भव पुस्तकस्य साहाय्येन व्यञ्जनसन्धिं बोधयत।

(iii) सदैव **<u>तन्मयः</u>** भूत्वा कार्य कर्त्तव्यम् । **तत्+मयः** अभ्यासवान भव पुस्तकस्य साहाय्येन व्यञ्जनसन्धिं बोधयत।

(iv) **<u>हिमकरः + अपि</u>** बालभावात् प्रजाति। **हिमकरोऽपि** अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत– (4x1=4)**

(i) कुत्सितवस्तुमिश्रितं भक्ष्यं समलं **<u>धरातलम्</u>** ।

(क) धरायै तलम् इति असम्बद्धः विकल्पः।
(ख) धरायाः तलम् **धरायाः तलम्** इति समुचितम् उत्तरम्
(ग) धरया तलम् इति चित्तभ्रामकः विकल्पः।
(घ) धरायां तलम् इति चित्तभ्रामकः विकल्पः।

(ii) **<u>भीमः च अर्जुनः च</u>** प्रविशतः ।

(क) भीमार्जुनौ इति समुचितम् उत्तरम्
(ख) भीमर्जुनः इति समासरहितं विकल्पम्
(ग) भीमात् अर्जुन च इतिचित्तभ्रामकः विकल्पः।
(घ) भीमधार्जुनश्च इति असम्बद्धः विकल्पः।

(iii) बालकाः **<u>यथाशक्तिं</u>** कार्यं कुर्वन्ति ।

(क) शक्तेः समीपम् इति असम्बद्धः समासः।
(ख) शक्तेः योग्यम् इति असम्बद्धः समासः।
(ग) शक्तिम् अनतिक्रम्य इति समुचितम् उत्तरम्

(घ) शक्तिं प्रति इति चित्तभ्रामकम् उत्तरम्

(iv) **<u>भयेन आकुलं</u>** व्याघ्रं दृष्टवा श्रृगालः हसन्नाह।

(क) भयमाकुलम् इतिचित्तभ्रामकः विकल्पः।

(ख) भयेनाकुलम् इति असम्बद्धः विकल्पः।

(ग) भयेन कुलम् इति समासरहितं विकल्पम्

(घ) भयाकुलम्   इति समुचितम् उत्तरम्

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितं उत्तरं विकल्पेभ्यः चित्वा लिखत–** **(4x1=4)**

**परामर्शः**– प्रत्ययानां सम्यगवबोधः।

(i) यत्रास्ते सा **<u>धूर्त +टाप्</u>** तत्र गम्यताम्।

(क) धूर्तटा इति असम्बद्धम् उत्तरम्।

(ख) धूर्ता इति समुचितम् उत्तरम्।

(ग) धूर्त इति असम्बद्धम् उत्तरम्।

(घ) धूत्रा इति चित्तभ्रामकम् उत्तरम्।

(ii) **<u>श्रद्धा+मतुप्</u>** लभते ज्ञानम् ।

(क) श्रद्धावान् इति समुचितम् उत्तरम्।

(ख) श्रद्धावताः इति असम्बद्धम् उत्तरम्।

(ग) श्रद्धावन् इति चित्तभ्रामकम् उत्तरम्।

(घ) श्रद्धामन् इति असम्बद्धम् उत्तरम्।

(iii) परिश्रमस्य **<u>महत्त्वम्</u>** सर्वे जानन्ति एव।

(क) मह+त्वत् इति असम्बद्धम् उत्तरम्।

ख) महत्+त्व इति समुचितम् उत्तरम्।

(ग) महा+त्वम् इति चित्तभ्रामकम् उत्तरम्।

(घ) मह+त्वम् इति चित्तभ्रामकम् उत्तरम्।

(iv) सम्प्रति **<u>वार्षिकी</u>** परीक्षा प्रचलति ।

(क) वर्ष+की इति असम्बद्धम् उत्तरम्।

(ख) वर्षा+ठक् इति चित्तभ्रामकम् उत्तरम्।

(ग) वर्ष+शतृ इति चित्तभ्रामकम् उत्तरम्।

(घ) वर्ष+ठक् इति समुचितम् उत्तरम्।

**8.वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत - (3x1=3)**

(i) अस्माभिः ईश्वरः …………………।

(क) स्मर्यते इति समुचितम् उत्तरम्। कर्मवाच्ये तृतीयान्तकर्त्रा अस्माभिः सह आत्मनेपदी क्रिया भवति।

(ख) स्मरामि इति चित्तभ्रामकम् उत्तरम्।

(ग) स्मरणामः इति असम्बद्धम् उत्तरम्।

(घ) स्मरामः इति असम्बद्धम् उत्तरम्।

(ii) अहं लेखं …………………।

(क) लिख्यते इति असंगतम् उत्तरम्। कर्मवाच्ये तृतीयान्तकर्त्रा मया सह आत्मनेपदी क्रिया भवति।

(ख) लिखामि इति समुचितम् उत्तरम् । यदा छात्राणां लकारेषु गतिः भविष्यति तदैव "अहम्" इति पदं दृष्ट्वा छात्राः "लिखामि" इति उचितं क्रियापदं योजयितुं शक्यते।

(ग) लिखति इति असंगतम् उत्तरम्।

(घ) लिखेयम् इति असंगतम् उत्तरम्।

(iii) दुष्टैः …………………पीड्यन्ते।

(क) शिष्टान् इति असंगतम् उत्तरम्।

(ख) शिष्टेन इति असंगतम् उत्तरम्।

(क) शिष्टाः कर्मवाच्ये कर्तरि तृतीया, आत्मनेपदी धातुना सह कर्तरि तृतीया विभक्तिर्भवति।

(घ) शिष्टात् इति असंगतम् उत्तरम्। पूर्ववत् बोध्यम्।

9. **कालबोधकशब्दैः अधोलिखित- दिनचर्यां पूरयत** (4x1=4)

(i) हर्षवर्धनः प्रातः …**सपादषड्वादने** ……… (6:15) उत्तिष्ठति।

(ii) सः प्रातः …… **अष्टवादने** ……… (8.00) विद्यालयं गच्छति ।

(iii) स: मध्याह्ने …… **सार्धद्विवादने** ……… (2:30) गृहम् आगच्छति ।

(iv) रात्रौ ………… **पादोनदशवादने**……(9:45) शयनाय स्वकक्षं गच्छति ।

**परामर्शः**– समयस्य भाषायां ज्ञानम् अनिवार्यम्। ज्ञात्वा लिखन्तु।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत–**

(i) ……**अद्य**…… मम जन्मदिनम् अस्ति । अस्ति इति वर्तमानकालिकां क्रियां दृष्ट्वा वर्तमानदिवसस्य संगतिः स्वीकरणीया। अर्थात् अत्र अद्य पदस्य संगतिः भविष्यति।

(ii) सिंहः ……**इतस्ततः** … गर्जति । सिंहेन सह उच्चैः पदस्य संगतिः स्वाभाविकतया करणीया।

(iii) वानराः **उच्चैः** …… कूर्दन्ति। शिष्टस्य इतस्ततः पदस्य संगतिःस्वाभाविकतया करणीया।

**11. अधोलिखित- वाक्येषु रेखाङ्कित - अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत- ( 3x1=3)**

(i) तानि मम **मित्रम्** सन्ति।

(क) मित्र इति असंगतम् उत्तरम्।

(ख) मित्राणि इति समुचितम् उत्तरम् ।

(ग) मित्रे इति असंगतम् उत्तरम्।

(घ) मित्रा: इति असंगतम् उत्तरम्।

(ii) अद्य रविवासरः **आसीत् ।**

(क) अस्ति इति समुचितम् उत्तरम् । अस्ति इति वर्तमानकालिकां क्रियां दृष्ट्वा वर्तमानदिवसस्य संगतिः स्वीकरणीया। अर्थात् अत्र अद्य पदस्य संगतिः भविष्यति।

(ख) अस्मि इति असंगतम् उत्तरम्।

(ग) भविष्यति इति असंगतम् उत्तरम्।

(घ) अभवत् इति असंगतम् उत्तरम्।

(iii) अहं पुस्तकं **पठति।**

(क) पठसि इति असंगतम् उत्तरम्।

(ख) पठामः इति असंगतम् उत्तरम्।

(ग) पठेयम् इति सम्भवम् उचितं च उत्तरम्। उत्तमपुरुषस्य कर्त्रा सह उत्तमपुरुषस्य क्रिया युज्यते।

(घ) पठामि इति समुचितम् उत्तरम् । उत्तमपुरुषस्य कर्त्रा सह उत्तमपुरुषस्य क्रिया युज्यते।

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत (5)**

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा सः पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः। पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्। पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा' एवं विचार्य सः पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

**I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम् ) (2x2=1)**

(i) निर्धनः जनः परिश्रम्य किम् उपार्जितवान्? **वित्तम्**

(ii) पुत्रः कुत्र निवसन् अध्ययने संलग्नः समभूत् ? **छात्रावासे**

(iii) स: किं विहाय पदातिरेव प्राचलत् ? **बसयानम्**

**परामर्श:-**छात्रा: पठितगद्यांशाद् समुचितस्य उत्तरस्य अन्वेषणे समर्था: भवेयु:।

**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम् )**

(i) किं विचार्य सः पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं गृहस्थमुपागतः?

**उत्तरम्**– निशान्धकारे प्रसृते …………….गृहस्थमुपागतः।

(ii) पिता किमर्थं व्याकुलो जात:?

**उत्तरम्**– एकदा स पिता तनूजस्य……………..व्याकुलो जातः।

(iii) कः तस्मै आश्रयं प्रायच्छत्?

उत्तरम्– करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

**परामर्श:-** छात्रा: पठितगद्यांशाद् अवबोधनस्य आधारेण समुचितवाक्यस्य चयने समर्था: भवेयु:: ।

**III. अ. निर्देशानुसारम् उत्तरत** - (2x1=2)

(i) 'रात्रि' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ? **निशा** छात्राणां कृते विपरीतपर्यायपदानां च ज्ञानसम्पादनम्।

(ii) "परमर्थकार्थ्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्" अस्मिन् वाक्ये क्रियापदं किम्? **प्राचलत्** छात्राणां कृते क्रियापदानाम् एवञ्च कर्तृपदानां ज्ञानसम्पादनम्।

अथवा

**आ. निर्देशानुसारम् उत्तरत -**

(i) "समीपे" इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्? **पार्श्वे** छात्राणां कृते विपरीतपर्यायपदानां च ज्ञानसम्पादनम्।

(ii) "करुणापरः" इति विशेषणपदस्य विशेष्यपदं किम् ? **गृही** छात्राणां कृते विशेषणविशेष्यो: ज्ञानसम्पादनम्।

**13. अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - (5)**

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च॥

**I. एकपदेन उत्तरत (केवलं प्रश्नद्वयम् )** (2x2=1)

(i) कस्य श्रेयः इच्छति? **आत्मनः**

(ii) कीदृशं कर्म न कुर्यात् ? **अहितं**

(iii) अहितं कर्म केभ्यः न कुर्यात् ? **परेभ्यः**

**परामर्श:-** छात्रा: पठितपद्यांशाद् समुचितस्य उत्तरस्य अन्वेषणे समर्था: भवेयु::।

**पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् ) (2x1=2)**

(i) अहितं कर्म कस्य न कुर्यात् ? **उत्तरम्**– य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।

(ii) परेभ्यः किं न कुर्यात् ? **उत्तरम्**– अहितं कर्म न कुर्यात् ।

(iii) श्रेयातिरिक्तं जनः किम् इच्छति? **उत्तरम्**– जनः श्रेयातिरिक्तं प्रभूतानि सुखानि च इच्छति।

**परामर्शः-** छात्रा: पठितपद्यांशाद् अवबोधनस्य आधारेण समुचितवाक्यस्य चयने समर्था: भवेयुः ।

**निर्देशानुसारम् उत्तरत– (2x1=2)**

(i) "प्रभूतानि सुखानि" अत्र विशेष्यपदं किम्? **सुखानि**

(ii) “यः इच्छत्यात्मनः श्रेयः" अस्मिन् वाक्ये क्रियापदं किम् ? **इच्छति**

अथवा

**आ. निर्देशानुसारम् उत्तरत**

(i) ‘हितम्' इत्यस्य किं विलोमपदं पद्यांशे प्रयुक्तम्? **अहितम्** छात्राणां कृते विपरीतपदानां ज्ञानसम्पादनम्।

(ii) 'अहितं कर्म" अत्र विशेष्यपदं किम्? **कर्म** छात्राणां कृते विशेषणविशेष्यो: ज्ञानसम्पादनम्।

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत (5)**

(गजः तं वृक्षमेव स्वशुण्डेन आलोडयितुमिच्छति परं वानरस्तु कूर्दित्वा अन्यं वृक्षमारोहति। एवं गजं वृक्षात् वृक्षं प्रति धावन्तं दृष्ट्वा सिंहः अपि हसति वदति च)

सिंहः - भोः गज! मामप्येवमेवातुदन् एते वानराः ।

वानरः – एतस्मादेव तु कथयामि यदहमेव योग्यः वनराजपदाय येन विशालकायं पराक्रमिणं, भयकरं चापि सिहं गजं वा पराजेतुं समर्था अस्माकं जातिः । अतः वन्यजन्तूनां रक्षायै वयमेव क्षमाः ।

वयमेव क्षमाः। (एतत्सर्वं श्रुत्वा नदीमध्यस्थितः एकः बकः)

बक:– अरे! अरे! मां विहाय कथमन्यः कोऽपि राजा भवितुमर्हति । अहं तु शीतले जले बहुकालपर्यन्तम् अविचल: ध्यानमग्नः स्थितप्रज्ञः इव स्थित्वा सर्वेषां रक्षायाः उपायाः चिन्तयिष्यामि।

**I. एकपदेन उत्तरत (केवलं प्रश्नद्वयम् )** (2x ½ =1)

(i) कः अन्यं वृक्षम् आरोहति? **वानर:**

(ii) कः सर्वेषां रक्षायाः उपायाः चिन्तयिष्यति? **बक:**

(iii) स्थितप्रज्ञः इव कः स्थितः भवति? **बक:**

**परामर्शः-** छात्रा: पठितनाट्यांशात् समुचितस्य उत्तरस्य अन्वेषणे समर्था: भवेयुः।

**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम् )** (2x1=2)

(i) सिंह : किं वदति ? **उत्तरम्**– भोः गज! मामप्येवमेवातुदन् एते वानराः।

(ii) सिंहः किं दृष्ट्वा हसति? **उत्तरम्**– गजं वृक्षात् वृक्षं प्रति धावन्तं दृष्ट्वा सिंह अपि हसति।

(iii) वानरः किं वदति ? एतस्मादेव तु कथयामि………….. वयमेव क्षमाः।

**परामर्शः-** छात्रा: पठितनाट्यांशात् अवबोधनस्य आधारेण समुचितवाक्यस्य चयने समर्था: भवेयुः।

**अ. निर्देशानुसारम् उत्तरत**–

(i) 'त्यक्त्वा' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ? **विहाय** छात्राणां कृते विपरीतपर्यायपदानां ज्ञानसम्पादनम्।

(ii) ' शीतले' इत्यस्य विशेष्यपदं नाट्यांशात् चित्वा लिखत। **जले** छात्राणां कृते विशेषणविशेष्यो: ज्ञानसम्पादनम्।

अथवा

**आ. निर्देशानुसारम् उत्तरत**–

(i) 'ऊष्णे' इति पदस्य किं विपर्ययपदम् अत्र प्रयुक्तम् ? **शीतले** छात्राणां कृते विपरीतपर्यायपदानां ज्ञानसम्पादनम्।

(ii) 'मामप्येवमेवातुदन् एते वानराः' अस्मिन् वाक्ये क्रियापदं किम् ? **अतुदन्** छात्राणां कृते क्रियापदानाम् एवञ्च कर्तृपदानां ज्ञानसम्पादनम्।

**15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत (4x1=4)**

(i) सः ऋषभः <u>**क्षेत्रे**</u> पपात। **कुत्र/कस्मिन्**

(ii) सः <u>**प्राणेभ्यः**</u> अपि विशिष्टः भवति। **केभ्यः**

(iii) करुणापरो गृही <u>**तस्मै**</u> आश्रयं प्रायच्छत्। **कस्मै**

(iv) एक: <u>**चातकः**</u> वने वसति। **क :**

**परामर्शः-** छात्राणां कृते प्रश्नवाचकपदानां ज्ञानसम्पादनम्, किम् शब्दरूपाणां त्रिषु लिङ्गेषु ज्ञानम्।

**16. अ. - मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं लिखत (4x1=4)**

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
तदेवाहुः महात्मानः समत्वमिति तथ्यतः॥

**अन्वयः -** यथा **(i)** ……**चित्ते** तथा वाचि यदि (ii) … **अवक्रता** भवेत्, (iii) … महात्मानः .. तदेव समत्वम् इति(iv) … **तथ्यतः** … आहुः।

**परामर्शः -** श्लोकस्य अर्थानुसारं पदानां व्यवस्थापन- कौशलस्य सम्पादनम्।

अथवा

**आ. मञ्जूषायाः साहाय्येन रिक्तस्थानानि पूरयित्वा पद्यांशस्य भावार्थं पुनः लिखत- (4x1=4)**

पद्यांशः- क्रोधो हि शत्रुः प्रथमो नराणां, देहस्थितो देह विनाशनाय।
यथा स्थितः काष्ठगतो हि वह्निः, स एव वह्निर्दहते शरीरम्॥

**भावार्थ:-** मनुष्यस्य शरीरे स्थित: (i) **क्रोधः** …… एव तस्य शरीरस्य विनाशाय प्रथमः (ii) **शत्रुः**… भवति। यथा काष्ठे स्थितः (iii) **अग्निः** … काष्ठं ज्वालयितुं कारणो (iv) **भवति** ..।

**परामर्श:-** श्लोकस्य भावार्थस्य ज्ञानं, संस्कृते अर्थलेखनस्य सामर्थ्य संपादनम्।

**17. अधोलिखितं कथांशं समुचित - क्रमेण लिखत (8x½=4)**

(i) कश्चन निर्धनः जनः वित्तमुपार्जितवान् ।

(ii) पठनकाले छात्रावासे निवसन् तस्य पुत्रः रुग्णः अभवत्।

(iii) सः पुत्रं द्रष्टुं बसयानं विहाय पदातिरेव प्राचलत्।

(iv) मार्गे रात्रौ करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

(v) तस्मिन् गृहे रात्रौ कश्चन चौर: गृहाभ्यन्तरं प्रविष्टः।

(vi) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः अभवत् तमन्वधावत् च।।

(vii) न्यायाधीशेन पुनः तौ घटनायाः विषये वक्तुम् आदिष्टौ ।

(viii) न्यायाधीशः तम् अतिथिं ससम्मानं मुक्तवान्।

**परामर्श:-** कथाया: केंद्रीय भावार्थस्य ज्ञानसम्पादनम्,वाक्यानां कथाक्रमानुसारेण योजनाया: पाठनम्

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितम् अर्थं चित्वा लिखत-** (3x1=3)

(i) यत् **प्रोक्तं** येन केनापि।

(क) कथितम् इति समुचितम् उत्तरम् ।

(ख) श्रुतम् इति असंगतम् उत्तरम्।

(ग) पठितम् इति चित्तभ्रामकम् उत्तरम्।

(घ) रचितम् इति असंगतम् उत्तरम्।

(ii)अद्य गगने बहवः **अम्भोदाः** सन्ति ।

(क) मेघाः इति समुचितम् उत्तरम् ।

(ख) चातकाः इति चित्तभ्रामकम् उत्तरम्।

(ग) खगाः इति असंगतम् उत्तरम्।

(घ) वृक्षा: इति असंगतम् उत्तरम्।

(iii) पिता पुत्राय विद्याधनं **यच्छति।**

(क) लभते इति असंगतम् उत्तरम्।

(ख) चलति इति चित्तभ्रामकम् उत्तरम्।

(ग) ददाति इति समुचितम् उत्तरम् ।

(घ) करोति इति असंगतम् उत्तरम्।

**परामर्शः** – छात्राणां कृते पर्यायपदानाम् अवबोधनम्, एवञ्च प्रसङ्गानुसारम् अर्थग्रहणस्य सामर्थ्यस्य विस्तारः।